किं दृक्कर्म्म तथोदयास्तसमये द्वेधा विदध्युर्बुधाः
सर्व्वं मे विमलं वदामलमलं गोलं विजानासि चेत् ॥'

अथ त्रिप्रश्नोदितदिनमानभेदप्रश्नं श्लोकद्वयेनाह ।

'महदहः किमहो रजनी तनु-
र्दिनमणौ गणकोत्तरगोलगे ।
ननु तनुर्दिवसो महती निशा
वद विचक्षण ! दक्षिणदिग्गते ॥
भवति किं द्युनिशं द्युनिवासिनां
द्युमणिवर्षमितञ्च सुरद्विषाम् ।
पितृषु किं शशिमाससमं तथा
युगसहस्रयुगं द्रुहिणस्य किम् ॥'

अथ राश्युदयमानकालभेदप्रश्नमाह ।

'भवलयस्य किलार्कलवाः समाः
किमसमैः समयैः खलु राशयः ।
समुपयान्त्युदयं किमु गोलवि-
न्नविषयेष्वखिलेष्वपि ते समाः ॥'

अथ द्युज्याकुज्यादिसंस्थानप्रश्नं वृत्तार्द्धेनाह ।

'द्युज्याकुज्यापमसमनराग्राचलज्यादिकानां
विद्वन् ! गोले वियति हि यथा दर्शय त्वञ्च संस्थाम् ॥'

अथ चन्द्रार्कग्रहणयोः दिक्कालभेदाद्युपपत्तिप्रश्नान् श्लोकोत्तरार्द्धेनाह ।

'तिथ्यन्ते चेत् ग्रह उडुपतेः किन्न भानोस्तदानीं
इन्दोः प्राच्यां भवति हि रवेः प्रग्रहः किं प्रतीच्याम् ।'
लम्बनं वद किं का च नतिमतिमतां वर ! ।
तत्संस्कृतिस्तिथौ वाणे किं ते सिद्धे कुतः कुतः ॥'

अथ शृङ्गोन्नतौ चन्द्रस्य शुक्लस्य क्षयवृद्धिप्रश्नमाह ।

'शुक्लस्य द्विजराज एष महसो हान्याः कुतस्तः कुतः
सद्वृत्तत्वगतोऽप्यहो भ्रमवशाद्दोषाभिसङ्गादिव ।
संप्राप्याथ पुनः क्षयीतनुमतस्तस्याश्रये नैव किं
शुक्लस्य क्रमशस्तथैव महसो वृद्धेरति सद्वृत्तताम् ॥'

अथ प्रथमप्रश्नस्य पृथिवीसंस्थानोपपत्तेरुत्तरं विवक्षुरादिसर्गे पृथिव्यादीनां तत्त्वानामादितत्त्वं निखिलजगज्जनकबीजं परं ब्रह्म मनसा प्रणिपत्यादौ तावत् तज्जन्यमाह ।

'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भेऽहङ्कारोऽभूत् खकशिखिजलोर्व्यस्ततः संहतेश्च ।
ब्रह्माण्डं यज्जठरगमहीपृष्ठनिष्ठो विरिञ्चिर्विश्वं शश्वत् सृजति परमं ब्रह्म तत्तत्त्वमाद्यम् ॥'

अथ भूमेः स्वरूपमाह ।

भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षा-
वृत्तैर्वृत्तो वृतः सन् मृदनिलसलिलव्योमतेजोमयोऽयम् ।
नान्याधारः स्वशक्त्या वियति च नियतं तिष्ठतीहास्य पृष्ठे
निष्ठं विश्वञ्च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात् ॥
सर्व्वतः पर्व्वतारामग्रामचैत्यचयैश्चितः ।
कदम्बकुसुमग्रन्थिः केशरप्रकरैरिव ॥'

अथ पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह ।

मूर्त्तो धर्त्ता चेद्धरित्र्यास्तदन्य-
स्तस्याप्यन्योऽप्येवमत्रानवस्था ।
अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये
किं नो भूमिः साष्टमूर्त्तेश्च मूर्त्तिः ॥'

अथ कथमियं भूमेः स्वशक्तिरित्याशङ्कां परिहरन्नाह ।

'यथोष्णतार्कानलयोश्च शीतता
विधौ द्रुतिः के कठिनत्वमश्मनि ।
मरुच्चलो भूरचला स्वभावतो
यतो विचित्रा खलु वस्तुशक्तयः ॥
आकृष्टशक्तिश्च मही तया यत्
खस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत् पततीव भाति
समे समन्तात् क्व पतत्वियं खे ॥'

अथ बौद्धानां युक्तिमाह ।

'भपञ्जरस्य भ्रमणावलोका-
दाधारशून्या कुरितिप्रतीतिः ।
खस्थं न दृष्टं गुरु च क्षमातः
खेऽधः प्रयातीति वदन्ति बौद्धाः ॥
द्वौ द्वौ रवीन्दू भगणौ च तद्व-
देकान्तरौ तावुदयं व्रजेताम् ।
यदब्रुवन्नेवमनर्थवादान्
ब्रवीम्यतस्तान् प्रतियुक्तियुक्तम् ॥'

अथ तेषां युक्तिभङ्गमाह ।

'भूः खेऽधः खलु यातीति बुद्धिर्बौद्ध ! मुधा कथम् ।
यातायातञ्च दृष्ट्वापि खे यत् क्षिप्तं गुरु क्षितिम् ॥'

अथ जिनानां युक्तिभङ्गमाह ।

'किं गण्यं तव वैगुण्यं द्वैगुण्यं यो वृथाकथाः ।
भार्केन्दूनां विलोक्याह्ना ध्रुवमत्स्यपरिभ्रमम् ॥'

भूगोलस्य समतां निराकर्त्तुमाह ।

'यदि समा मुकुरोदरसन्निभा
भगवती धरणी तरणिः क्षितेः ।
उपरि दूरगतोऽपि परिभ्रमन्
किमु नरैरमरैरिव नेक्ष्यते ॥
यदि निशाजनकः कनकाचलः
किमु तदन्तरगः स न दृश्यते ।
उदगयं ननु मेरुरथांशुमान्
कथमुदेति स दक्षिणभागतः ॥'

अथ प्रत्यक्षविरोधशङ्कां निरस्यन्नाह ।

'समो यतः स्यात् परिधेः शतांशः
पृथ्वी च पृथ्वी नितरां तनीयान् ।
नरश्च तत्पृष्ठगतस्य कृत्स्ना
समेव तस्य प्रतिभात्यतः सा ॥'

श्लोकस्य भूपरिधिप्रमाणस्य उपपत्तिमाह ।

'पुरान्तरं चेदिदमुत्तरं स्यात्
तदक्षविश्लेषलवैस्तदा किम् ।
चक्रांशकैरित्यनुपातयुक्त्या
युक्तं निरुक्तं परिधेः प्रमाणम् ॥'

तदेव दृढीकुर्व्वन्नाह ।

'निरक्षदेशात् क्षितिषोडशांशे
भवेदवन्ती गणितेन यस्मात् ।
तदन्तरं षोडशसंगुणं स्याद्
भमानमस्माद्बहु किं तदुक्तम् ॥
शृङ्गोन्नतिग्रहयुतिग्रहणोदयास्त-
च्छायादिकं परिधिना घटतेऽमुना हि ।
नान्येन तेन जगुरुक्तमहीप्रमाण-
प्रामाण्यमन्वययुजा व्यतिरेककेण ॥'

अथ भूगोलपुरनिवेशमाह ।

'लङ्का कुमध्ये यमकोटिरस्याः
प्राक्पश्चिमे रोमकपत्तनञ्च ।
अधस्ततः सिद्धपुरं सुमेरुः
सौम्येऽथ याम्ये वडवानलश्च ॥
कुवृत्तपादान्तरितानि तानि
स्थानानि षड्गोलविदो वदन्ति ।
वसन्ति मेरौ सुरसिद्धसंघा
और्व्वे च सर्व्वे नरकाः सदैत्याः ॥
यो यत्र तिष्ठत्यवनीतलस्थ-
मात्मानमस्या उपरिस्थितञ्च ।
स मन्यतेऽतः कुचतुर्थसंस्था
मिथश्च ते तिर्य्यगिवामनन्ति ॥
अधःशिरस्का कुदलान्तरस्था
च्छाया मनुष्या इव नीरतीरे ।
अनाकुलास्तिर्य्यगधःस्थिताश्च
तिष्ठन्ति ते तत्र वयं यथात्र ॥'

अथ द्वीपानां समुद्राणाञ्च संस्थानमाह ।

'भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बूद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
लवणजलधिरादौ दुग्धसिन्धुश्च तस्मा-
दमृतममृतरश्मिः श्रीश्च यस्मादभूव ।
महितचरणपद्मः पद्मजन्मादिदेवै-
र्वसति सकलवासो वासुदेवश्च यत्र ॥
दध्नो घृतस्येक्षुरसस्य तस्मा-
न्मद्यस्य च स्वादुजलस्य चान्त्यः ।
स्वादूदकान्तर्वडवानलोऽसौ
पातालकोकाः पृथिवीपुटानि ॥
वसत्फणा मणिगणांशुकृतप्रकाशा
एतेषु सासुरगणाः फणिनो वसन्ति ।
दीव्यन्ति दिव्यरमणीरमणीयदेहैः
सिद्धाश्च तत्र हि लसत्कनकावभासैः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति ॥'